(1)

# अभिज्ञान शकुन्तलम्

## आख्या

सरसिजमनुविद्धं शैवलेनापि रम्यं ........ किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

(प्रथमोऽङ्कः श्लोक – ३८)

## तात्पर्य :-

महाराजः दुष्यन्तः मण्डनविहीनां वल्कलपरिहितां निसर्गरमनीयां शकुन्तलां दृष्ट्वा। तस्याः स्वभावसौन्दर्यस्य रमणीयत्वं वर्णनाप्रसङ्गे कथयति — सरसिजम् इति।

सरसिजायते यत् तत् सरसिजं स्वभावसुन्दरम्। सरसिजं कमलम् शैवलेन जलनीलिकया नाम तृणभेदेन अनुविद्धम् अपि आच्छन्नम् अपि मनोहरं भवति जनानां दृष्टिनन्दनं भवति। शशचिह्नं मलिनमपि कृष्णवर्णमपि हिमांशोः चन्द्रस्य लक्ष्मीं सुषमां तनोति विस्तारयति। पुरतः दृश्यमाना इयं शकुन्तला वल्कलेन समावृतापि मनोहरा भवति, एतानि सर्वानि समालोच्य राज्ञा दुष्यन्तेन मनसि उक्तम् मधुराणां निसर्गमनोज्ञानाम् आकृतीनां देहानां किमिव मण्डनं भूषणं न ? अपि तु सर्वं भूषणानां प्रवक्ष्यते इति भावः। अस्य अंशस्य सरलार्थं मिदं यत — पद्मम शैवालेन आच्छानमपि सुन्दरम्। चन्द्रे कलङ्कः विद्यमानेऽपि स अतिव सुन्दर। इयम् तन्वी शकुन्तला वृक्षत्वचापि अतिव सुन्दरी। यः प्रकृतः सुन्दरः तस्य सर्वमेव अलङ्कारः तस्य नव अलंकारेन मण्डनेन प्रयोजनम नास्ति।

अस्य श्लोकस्य प्रथम भागे प्रतिवस्तुपमा अलङ्कारः चतुर्थ चरणे अर्थान्तरन्यासः अलङ्कार, मालिनी च वृत्तम्।

Scanned with CamScanner